International Journal of Sanskrit Research 2021; 7(1): 250-253

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 250-253
© 2021 IJSR
www.anantaajournal.com
Received: 10-11-2020
Accepted: 17-12-2020

**Shambhu Nath Ghosh**
Research Scholars (Ph.D),
Department of Sanskrit,
Pondicherry University,
R.V.Nagar, Kalapet,
Puducherry, India

**Corresponding Author:**
**Shambhu Nath Ghosh**
Research Scholars (Ph.D),
Department of Sanskrit,
Pondicherry University,
R.V.Nagar, Kalapet,
Puducherry, India

# कृष्णमित्रप्रणीतस्य शब्दकौस्तुभस्य भावप्रदीपव्याख्यायाः वैशिष्ट्यम्

**Shambhu Nath Ghosh**

**प्रस्तावना**

संस्कृतभाषायाः सर्वास्येव शाखासु विरचितानां ग्रन्थानामर्थावगमः टीकां विना न सम्भवति । तस्मादेकस्यैव ग्रन्थस्योपरि विद्वद्भिः विविधटीकाः प्रणीताः । तत्र यासु शाखासु याः याष्टीका विदुषां प्रशंसापदवीमारोहन्ति तासां मध्ये वेदानधिकृत्य सायणाचार्येण विरचितं सायणभाष्यं, वेदान्तानबलम्ब्य श्रीमद्शङ्कराचार्येण विरचितं शाङ्करभाष्यम्, अष्टाध्यायीमुपजीव्य कात्यायनेन वार्तिकं रचितम् । पतञ्जलिना रचितं महाभाष्यम्, वाचस्पतिमिश्रेण सांख्यतत्वकौमुदी, तत्ववैशारदी च, भरतमुनेः नाट्यशास्त्रस्योपरि अभिनवगुप्तपादेन अभिनवभारतीटीका ध्वन्यालोकग्रन्थस्योपरि लोचनटीका, मनुसंहितायाः भाष्यं मेधातिथिभाष्यं, रामायणस्य रामानुजकृतं भाष्यं, महाभारतस्योपरि नीलकण्ठटीका, काशिकायोपरि काशिकाविवरणपञ्जिका एवं अनेकाः टीकाग्रन्थाः विरचिताः ।

तथैव श्रीमताभट्टोजिदीक्षितेन अष्टाध्यायीमनुसृत्य शब्दकौस्तुभः नाम्नी एका महती वृत्तिः रचिता। एषा वृत्तिः सम्पूर्णरूपेण नैव उपलभ्यते । शब्दकौस्तुभग्रन्थे प्रथमाध्यायस्य प्रथमपादे प्रायशः पतञ्जलेः कैयटस्य एवं हरदत्तस्य मतं, तेषां ग्रन्थे वर्णितान् विषयान् च स्वीकृत्यैव स्वीयवाक्यैः तत्र संग्रहणं कृतं भट्टोजिदीक्षितपादैः । शब्दकौस्तुभे अयं भागः एव गम्भीरतया अधिकविस्ताररूपेण च लिखितः । इतः परं सक्षेपरूपेण विषयवर्णनं चकार । अस्य पिता लक्ष्मीधरभट्टः आसीत् भ्राता च रङ्गोजि भट्टः आसीत् । अस्य वंशवृक्षः एवं आसीत् -



प्रौढ मनोरमायाः एकः हस्तलेखः भण्डारकर प्राच्यविद्याशोधप्रतिष्ठान पूना नगरे संग्रहालये संरक्षितमस्ति । तस्मिन् हस्तलेखे अन्तिमे भागे एवं वर्णितमस्ति यत् - "श्रीवेदान्तप्रतिपादिताद्वैतसिद्धान्तस्थापनाचार्यलक्ष्मीधरपुत्रभट्टोजि. ..........मनोरमायां कृदन्तप्रक्रिया समाप्ता" ।[1] पण्डितराजजगन्नाथकृते प्रोढमनोरमाखण्डनम् इत्यनेन ग्रन्थेन एवं प्रतीयते यत् नृसिंहपुत्रः शेषकृष्णः तस्य व्याकरणशास्त्रस्य गुरुः आसीत् ।[2] भट्टोजिदीक्षितोऽपि शब्दकौस्तुभग्रन्थे प्रक्रियाप्रकाशकारस्य शेषकृष्णस्य कृते गुरु-शब्दस्य व्यवहारं चकार ।[3] तत्वकौस्तुभग्रन्थे भट्टोजिदीक्षितपादैः अप्ययदीक्षितः नमस्कृतः ।

आफ्रेक्टस्य वृहत्सूचीपत्रानुसारेण शब्दकौस्तुभस्य प्रथमपादस्य षट् टीकाः एव प्राप्यन्ते । ते च -

१. विषमपादी - नागेशभट्टः (१७१४)
२. प्रभाव्याख्या - वैद्यनाथः पायगुण्ड (१७४०)
३. उद्योत - वैद्यनाथ शुक्लः (Date unknown)
४. प्रभा - राघवेन्द्राचार्यः (१८४०)
५. भावप्रदीपः - कृष्णमिश्रः (१८००)
६. शब्दकौस्तुभदूषणव्याख्या - भाष्करदीक्षितः (Date Unknown)
७. गुणव्याख्या - इन्द्रदत्त उपाध्यायः(१८००)

एतासु अप्रकाशितासु व्याख्यासु अन्यतमा वर्तते श्रीकृष्णमिश्रकर्तृका भावप्रदीपव्याख्या। अस्याः परिचयः अत्र दीयते।

शब्दकौस्तुभस्य भावप्रदीपव्याख्यायाः कर्ता भवति कृष्णमिश्रः। अस्य कृष्णाचार्यः इति नामान्तरम्। कृष्णाचार्यस्य पिता रामसेवकः आसीत् (सं० १६५०-१७०० वि०)।[4] महाभाष्यस्योपरि "महाभाष्यप्रदीपव्याख्या" रामसेवकेन विरचिता । कृष्णाचार्यस्य प्रपितामहः देवीदत्तः आसीत् । देवीदत्तपादाः लक्ष्मपुरे निवसन्ति स्म । अनेन कृष्णमिश्रस्यापि गृहं लक्ष्मपुरे(वर्तमाने लखनऊ) आसीदिति वक्तुं शक्नुमः । कृष्णाचार्याः प्रसिद्धवैयाकरणाः आसन् । भावप्रदीपव्याख्यायाः रचना काल १८०० ख्रीष्टाव्दे आसीदिति तत्वविद्भिरनुमीयते ।

अस्य वंशवृक्षः एवं आसीत् -




**कृष्णमित्रेण विरचिताः ग्रन्थाः -**

अस्य च विदुषः बहुषु शास्त्रेषु अबाधगतिरासीदपि च तेन बहवः ग्रन्थाः विरचिताः । ते च -

a) सिद्धान्तकौमुद्याः उपरि रत्नार्णवटीका
b) युक्तिरत्नाकरः ग्रन्थः
c) वादचूडामणि ग्रन्थः
d) वादसुधाकरः ग्रन्थः
e) साङ्ख्यदर्शनस्योपरि तत्वमीमांसा नामक ग्रन्थः
f) भूषणसारस्योपरि रत्नप्रभा व्याख्या इत्यादयः।

कविकर्मणामपि मर्मार्थं सुखेन बोधयितुं काले काले विद्वद्भिर्बहवष्टीका विरचिताः । 'टीकृ'-धातोष्टीकाशब्दो निष्पन्नो भवति । 'टीकृ'धातोः कम्पनार्थत्वं स्पन्दनार्थत्वं वा काशिकाकर्तुरभिमतमिति प्रतिभाति । मालतीमधवे भवभूतिना लघुकम्पनार्थे धातुरयं प्रयुक्तः ।[5] धातुरूपकल्पद्रूमे धातुरयं गत्यर्थकत्वेन पठितः ।[6]

'टीकृ'धातोः ऋकारस्य "उपदेशेऽजनुनासिक इत्" (पा.सू.1.3.2) इति सूत्रानुसारेण इत् संज्ञकत्वात् "तस्य लोपः" (पा.सू.4.1.4) इति सूत्रानुसारेण लोपे करणे क-प्रत्यये विहिते "अजाद्यतष्टाप्" (पा.सू.4.1.4) इति सूत्रानुसारेण टीकाशब्दो निष्पन्नो भवति । टीका-शब्दस्यार्थो विविधकोषग्रन्थेषु निरूपितः । वामनशिवराम-आप्ते-महोदयेन टीकाशब्दस्यार्थ एवं निरूपितः "टीक्यते गम्यते ग्रन्थार्थोऽनया इति"। वाचस्पत्य-कोषग्रन्थे- टीका(गतौ) भ्वा.आत्म.सक.सेट्.टीकते, अटीकिष्ट । टीका स्त्री । टीक्यते गम्यते ग्रन्थार्थोऽनया । टीका-करणे घञर्थे क वा । "विषमपदव्याख्यारूपे ग्रन्थभेदे"[7] इत्यनुरूपा व्युत्पत्तिर्लभ्यते । अमरसिंहविरचितस्य अमरकोषग्रन्थे - "लङ्का शेफालिका टीका धातकीपञ्जिकाढकी"[8] त्यादिशब्दानां व्याख्यानावसरे रामाश्रमीनामिकायां टीकायां टीकास्वरूपविषये एवमुक्तम् - 'टीक्यतेऽर्थो यया' । हेमचन्द्रस्तु "टीका निरन्तरव्याख्या इति मूलं सुगमानां विषमाणां च निरन्तरं व्याख्या यस्यां सा"[9] इत्येवंरीत्या व्याख्यातवान् ।

न केवलं कोषग्रन्थे टीकाशब्दस्यार्थो निरूपितः, अस्यार्थनिरूपणे आलङ्कारिकाणां केषाञ्चिदपि प्रयासः परिलक्ष्यते । तत्र आलङ्कारिकेषु राजशेखरेण काव्यमीमांसाग्रन्थे उक्तम् - "यथासम्भवमर्थस्य टीकनं टीकेति"।[10]

**कृष्णमित्रप्रणीत-भावप्रदीपव्याख्यायाः वैशिष्ट्यानि -**

भट्टिजिदीक्षितविरचितस्य शब्दकौस्तुभस्य बहवष्टीकीः सन्ति । परिशील्यमाने सर्वासु टीकासु कृष्णमित्रप्रणीतस्य शब्दकौस्तुभस्य भावप्रदीपव्याख्यायाः वैशिष्ट्यं प्रदर्श्यते । अस्यां टीकायां कृष्णाचार्यस्य वैदुष्यं प्रत्येकमपि प्रसङ्गे प्रकटितं भवति । अस्याः व्याख्यायाः नामकरणेनैव ज्ञायते यत् कृष्णमित्रः पदानां सम्यक्तया विश्लेषणं व्याख्या च कृतवान् । कृष्णमिश्रः प्रथमाध्यायस्य प्रथमपादस्य प्रथमाह्निकस्य व्याख्यानादनन्तरं टीकायाः नामोल्लेखनं कृतवान् परन्तु NCC Catalogue मध्ये अस्याः व्याख्यायाः नामः भावदीपः/भावप्रदीपः

एवमासीत्। प्रतिज्ञानानुसारेण कृष्णमित्रस्य अस्यां टीकायां व्याकरणपिपासुनामवगमनाय
क्लिष्टपदप्रयोगादीनामर्थप्रत्यायनाय च विस्तृतं विवरणं प्रदत्तं वर्तते । टीकया अनया अस्या कवेः व्याकरणशास्त्रवैदुष्यं अवगम्यते । एवमेषा टीका छात्राणां सुलभतया अवगमने विदुषां मोदाय च कल्पते ।
भावप्रदीपव्याख्यायाः वैशिष्ट्येन अन्यकारणानि अधः प्रदर्श्यन्ते-

- व्याकरणशास्त्रावगमनस्य या खण्डान्वयात्मिका पद्धतिरस्ति तां पद्धतिमनुसृत्य एषा टीकाकारेण रचिता । एतादृशी टीका सरला, स्पष्टा च दृश्यते । यद्यपि रूचिपतेः टीका प्रसिद्धा, आदृता च । तथापि सा बहुषु स्थलेषु दुर्बोधा भवति व्यकरणभावग्रहणाय ।
- कुत्रापि व्याख्याने निरर्थकः विस्तरः टीकाकारेण न कृतः
- भावप्रदीपस्य शब्दानाम् अर्थावगमनाय क्लिष्टपदानां ज्ञापनाय च अधिकतया कोशानां वार्तिकानां विदुषां मतानां, वाक्यानि च प्रदर्शितानि । अनेनैव पाठेनैव पाठकस्य कृते अर्थावगमनं, कोशस्थवाक्यानां संज्ञापनमपि भविष्यति ।

**भावप्रदीपविशेषाः-**

नवाह्निकशब्दकौस्तुभस्य भावप्रदीपस्य सम्पुर्णभागः महता कष्टेन प्राप्तः। कतिचन सन्दर्भविशेषाः।

१. वृत्योपस्थापकस्यार्थवत्त्वस्यार्थवत्सूत्रे ग्रहणम् ।[11]
२. वस्तुतस्तु पदसमुदायो वाक्यम्। अत एवानर्थकं वाक्यमित्युक्तम् ।[12] (अइउण्)
३. आहुरित्यस्वरसबीजं तु निपातानुकरणे प्रगृह्यतावारणायार्थविशेषद्योतकानामेव निपातत्वस्य वक्तव्यतया नेह तत्संभवः (केचितु चादिषु---आहुः)।[13]
४. वर्णसमाम्नाये पृथक्निर्देशसामर्थादिति ग्रन्थसन्दर्भे सामर्थ्यादिति। बृद्धिरादैच् पूर्वौ तु ताभ्यामित्याद्यर्थं पृथक् निर्देशस्यावश्यकत्वात् चिन्त्यमेतदिति भावः ।[14]
५. प्लुतप्रगृह्या अचीति ज्ञापकेनेति। ईदूत्सूत्रे वक्ष्यमाणत्वात् चिन्त्यमेतत्।(अइउण्) । [15]
६. ऋलृक्। एकदेशविकृतेति। ननु षष्ठीनिर्दिष्टविषयोऽयं न्यायः---। अन्ये तु लोकदृष्टान्तसिद्ध एकदेशविकृतन्यायः षष्ठीनिर्देशाभावेऽपि प्रवर्तते। राजकीयमित्यादौ त्वनो नान्तस्य ग्रहणाददोष इत्याहुः ।[16]
७. सुहिन्सु इति। नुम् ग्रहणं नियमार्थमिति भाष्यप्रामाण्यादस्यानभिधानमित्यन्ये ।[17]
८. इह किञ्चित् त्रपो इति। परे तु चिन्त्यमेव तदित्याहुः ।[18]
९. वृक्षव इति। परे तु एतद् भाष्यग्रन्थस्य पूर्वपक्षपरतया अर्थान्तरपरतया व्याख्यानमयुक्तम्। एवञ्च वृक्षव इत्यष्टमाध्यायस्थभाष्यमेकदेश्युक्तिरित्याहुः ।[19]
इत्थं कतिचनविशेषा व्याख्याद्वयान्तर्गताः प्रदर्शिताः ।[20]

**भावप्रदीपव्याख्यायाः आरम्भः-**

विघ्नविघाताय मङ्गलमाचरति विश्वेशमिति। विश्वेशशब्दस्य लोकपालादावापि दर्शनादाह सच्चिदानन्दमिति। सदित्यनेन नित्यतोक्ता। सत्यं चानृत विरोधित्वेनवितथत्वम्। अभावस्याधिकरणात्मकतया ब्रह्मणो निर्धर्मकत्वसिद्धिः। चिदित्यनेन ज्ञानरूपता, तथा श्रुतिः - “नित्यविज्ञानमानन्दं ब्रह्मेति, सत्यं ज्ञानमनन्तं ब्रह्मेति च”। अनन्तत्वं देशतः कालतश्चापरिच्छिन्नत्वम्।

**व्याख्यायाः समाप्तिः-**

अभ्युपगमादिति। उदीच्यग्रामाच्च बह्वचोन्तोदात्तादित्यत्रं बाधित्वा बाहिकग्रामेभ्यश्च इति ठञ्ठौ भवतः। शाकलिकी शाकल्यिका इति तदुक्तेः।।

**अन्त्यटीका -**

1. व्याकरणविषयक सूचीपत्र(सन् 1638) संख्या 132,331/1895-1902
2. इह केचित् (भट्टोजिदीक्षिताः)....शेषवंशावतंमानां श्रीकृष्णपण्डितानां चिरायार्चितयोः पादुकयोः प्रसादादासादिलशब्दानुशासनास्तेषु च पारमेश्वरपदं प्रयातेषु तत्रभवद्भिरुल्लासित प्रक्रियाप्रकाश दूषणैः स्वनिर्मिताया मनोरमायामानुकुल्यमकार्षुः । चौखम्बा संस्कृत सीरिज काशीतः सं-1991 प्रकाशिते प्रौढमनोरमाया) भाग-3, पृष्ठ-1।
3. तदेतत् सकलमभिधाय प्रक्रियाप्रकाशे गुरुचरणैरुक्तम् । पृष्ठ 184 ।
4. संस्कृत व्याकरणशात्र का इतिहास, भाग-1, पृ.553
5. मालतीमाधवम् - काश्मर्याः कृतमालमुद्गतदलं कोयष्टिकष्टीकते 9.7
6. धातुरूपकल्पद्रूमः. पृ.60
7. अमरकोषः - 3.6.953
8. अभिधानचिन्तामणिः 2.170
9. काव्यमीमांसा द्वितीयोऽध्यायः
10. भावप्रदीपः 1/1
11. तत्रैव ¼
12. तत्रैव 2/3
13. तत्रैव 3/1
14. तत्रैव 4/2
15. तत्रैव 5/1
16. तत्रैव 6/1
17. तत्रैव 7/1
18. तत्रैव 8/1
19. तत्रैव 9/2
20. तत्रैव 9/1

**सन्दर्भग्रन्थसूची-**


1. आप्टे,शिवराम.संस्कृत-हिन्दी-कोश.राष्ट्रिय संस्कृत संस्थान्.1987
2. व्याकरणशास्त्रेतिहासः लोकमणिदहालः, भारतीयविद्याप्रकाशन, वाराणसी, १९९०
3. संस्कृतव्याकरणशास्त्र का इतिहास, युधिष्ठिरमीमांसक, चौखम्बा पब्लिशर्स वाराणसी,
4. संस्कृतव्याकरणशास्त्रेतिहासविमर्शः अशोकचन्द्रगौशास्त्रि, भारतीयविद्यासंस्थान वाराणसी,१९९७
5. वैयाकरणसिद्धान्तकौमुदी तत्वबोधिनीसहिता मेहचन्द्रालक्ष्मणदास पब्लिकेशन्, नई दिल्ली, १९८५
6. भारतीयग्रन्थशास्त्रप्रवेशिनी, आचार्य एस्.एम्.कत्रे,संस्कृतेन भाषान्तरयितारः
   आचार्य भट्ट लक्ष्मीनरसिंहः, डा.जा.रामकृष्ण.,डा. वि.जड्डीपाल्,राष्ट्रीयसंस्कृतविद्यापीठम्, तिरुपति,२००२
7. पाणिनीयव्याकरणमहाभाष्यम्(नवाह्निकम् छाया सहितम्) पतञ्जलिः, चोखम्भा संस्कृतसंस्थान्-वाराणासी, २००१
8. Encycolpedia of Indian Philosophies. ED. karl.H.Potter & Dr. K kunjunni Raja, Motilal Banarasi Das, Varanasi, 2002, ix.
9. Bhattoji Dixita, Dr. Suryakanta Bali, Oriental Publication, New Delhi, 1990.
10. भारतीय पुरालिपि विद्या (Indian Epigraphy), दिनेश चन्द्र सरकार, विद्यानिधि प्रकाशन, दिल्ली,२०१३
11. New Catalouge Catalogorem, K.Kunjunni Raja, University of Madras 1983.
12. Descriptive Catalouge V. Sambasiva Sastri, Oriental Research Institute, Trivendrum I-II.
13. Descriptive Catalouge, Adayar Library, Madras, 1984.
14. Descriptive Catalouge M.Rangacharya, Government Oriental Manuscripts Library- Madras.
15. Ncc Catalogue
16. Manuscript Catalouge. Sri Venkateswara Oriental Research Institute, Tirupati.
17. शब्दकौस्तुभ, चौखम्बा संस्कृत पाबलिकेशन्, 1902.
18. Central Library, Baroda Acc, no- 8933, शब्दकौस्तुभव्याख्या
19. Central Library, Baroda Acc, no- 12972, शब्दकौस्तुभव्याख्या
20. Central Library, Baroda Acc, no- 12653, शब्दकौस्तुभव्याख्या
21. फ्रेन्च इनस्टिटिउट्, पुदुच्चेरी, MSS NO-T, No-101, भावप्रदीपः